# ‘‘छात्राणां मूल्यांङ्कनार्थं परीक्षापयोगी प्रश्नावली’’

निर्मात्री
प्रो. ग़ज़ाला अंसारी
साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

# टिप्पणी

एते सर्वे प्रश्नाः छात्राणां मूल्याङ्कनार्थं सम्प्रेषिताः। मन्ये, यदि समाधानपुरस्सरं प्रश्नाः सञ्जाताः तर्हि छात्राणां मूल्याङ्कनं कथं भवितुमर्हति इति धिया प्रश्नोच्चयः एवाऽत्र प्रस्तूयते। सर्वेषां छात्राणां सविधे या पाठ्यसामग्री वर्तते, तासामेव एतेषां प्रश्नानां समाधानं वरीवर्ति। ते ध्यानेन पठित्वा तेषाम् अन्वेषणं कुर्वन्तु। समाधानं कृत्वा मां सूचयन्तु। यदि काचित् समस्या भवेच्चेत मां सम्पर्कयन्तु।

निर्मात्री
प्रो. ग़ज़ाला अंसारी
साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

# शास्त्रीतृतीयवर्षः

## पञ्चमपत्रम्

## साहित्यदर्पणः (तृतीयचतुर्थपरिच्छेदौ)

1. काव्यं कतिविधं मतम् ?
2. ध्वनिकाव्यं किम् ?
3. उत्तमं काव्यं किम् ?
4. लक्षणामूलध्वनेः अपरं नाम किम् ?
5. कस्मिन् काव्ये व्यङ्ग्यं वाच्यातिशायि भवति ?
6. अभिधामूलध्वनेः अपरं नाम किम् ?
7. कस्मिन् ध्वनौ वाच्यः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यस्य प्रकाशकः ?
8. अविवक्षितवाच्यध्वनिः कतिधा ?
9. अर्थान्तरसङ्क्रमितवाच्यध्वनिः कः ?
10. अत्यन्ततिरस्कृतवाच्यध्वनिः कः ?
11. विवक्षितान्यपरवाच्यध्वनेः कौ द्वौ भेदौ ?
12. अत्यन्ततिरस्कृतवाच्यध्वनेः उदाहरणं किम् ?

13. अर्थान्तरसङ्क्रमितवाच्यध्वनेः उदाहरणं किम् ? ②

14. 'निश्वासान्ध इवादर्शः' इति कस्य ध्वनेः उदाहरणम् ?

15. 'करिराजकरः करिराजकरः' अत्र कः ध्वनिः ?

16. रसादि अलक्ष्यक्रमो लक्ष्यक्रमो वा भवति ?

17. 'आमितः सामितः' इति पद्ये किं ध्वन्यते ?

18. अर्थशक्त्युद्भवध्वनिः कतिधा ?

19. कविनिबद्धवक्तृप्रौढोक्तेः उदाहरणमेकं लिखत ।

20. ध्वनेः कति भेदाः सम्भवन्ति ?

21. शब्दशक्त्युद्भवव्यङ्ग्यः कतिधा ?

22. 'नयने तस्यैव नयने' अत्र द्वितीय नयन-पदस्य कोऽर्थः ?

23. 'त्वामस्मि वच्मि' अत्र 'वच्मि' पदस्य लक्ष्यार्थः कः ?

24. 'आदित्योऽयं स्थितो मूढा ...' इति कस्य उदाहरणम् ?

25. 'वेदखाग्निशरा:' अत्र का संख्या सूच्यते ?

26. 'शुद्धेरिषुबाणाग्निसायका:' कोऽभिप्राय: ?

27. 'दुर्गालङ्घितविग्रह: ....' अत्र कोऽलङ्कारो व्यङ्ग्य: ?

28. वाच्याद् अनुत्तमे व्यङ्ग्ये कीदृशं काव्यम् ?

29. 'मथ्नामि कौरवशतं समरे न कोपात्' इति कस्योदाहरणम् ?

30. के चित्रकाव्यं स्वीकुर्वन्ति ?

31. गुणीभूतव्यङ्ग्यकाव्यं कतिविधम् ?

32. रसादीनां बोधे का वृत्ति: अपेक्षिता ?

33. 'विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीते: साधनमिष्यते' इति केनोक्तम् ?

34. ~~क्व अष्ट~~ के सन्ति स्थायीभावा: ?

35. 'वेद्यान्तरस्पर्शशून्यः' अस्य कोऽर्थः ?

36. 'चिन्मय' अत्र कः प्रत्ययः कश्चार्थः ?

37. रसे सर्वत्र कः सारोऽनुभूयते ?

38. करुणादीनां सुखमयत्वे प्रमाणं किम् ?

39. रसः कथं न कार्यः ?

40. विभावाः के सन्ति ?

41. रसः कथं न ज्ञाप्यः ?

42. 'सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः —'
अत्र व्यङ्ग्यस्वरूपं समुद्घाटयत ।

43. विश्वनाथमतानुसारेण चित्रकाव्यं खण्डयत ।

44. 'शिशिरे मन्दायते तेजो दाक्षिणात्यां रवेरपि —'
अत्र ध्वनेः स्वरूपम् उद्घाटयत ।

45. असंलक्ष्यक्रमध्वनेः किं स्वरूपं ? के च
भेदाः, स्पष्टयत ।

46. अर्थशक्त्युद्भवध्वनेः प्रबन्धप्रकाशत्वं
सोदाहरणं प्रतिपादयत ।

⑤

47. असंलक्ष्यक्रमध्वनेः अवान्तरभेदाः के ?

48. कः केन रसतामेति ? विश्वनाथोक्तदिशा प्रतिपादयत ।

49. किं नाम साधारणीकरणम् । तस्य का आवश्यकता ?

50. शब्दशक्तिउद्भवध्वनिः कः ? भेदसहितं स्पष्टयत ।

51. रसस्वरूपं विश्वनाथदिशा प्रतिपादयत ।

52. 'तदेवमेकपञ्चाशद् भेदास्तस्य ध्वनेर्मताः' स्पष्टयत ।

53. गुणीभूतव्यङ्ग्यस्य स्वरूपं सोदाहरणं प्रतिपादयत ।

54. 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्' विश्वनाथानुसारेण इत्यस्य खण्डनं कुरुत ।

55. रसः अलौकिकः कथम् ? विवेचयत ।

56. 'भेदास्तस्योदिता अष्टौ' स्पष्टयत ।

57. 'एकोऽपि भेदोऽनन्तत्वात् संख्येयस्तस्य नैव यत्' व्याख्या कार्या। (6)

58. 'आविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति' स्पष्टयत।

59. 'ध्वनिर्लक्ष्यक्रमव्यङ्ग्यास्त्रिविधः कथितो बुधैः' इति, व्याख्या कार्या।

60. 'सत्वोद्रेकादखण्डस्व ... सम्पूर्णं कारिकाद्वयं विलिख्य विवेचयत।

61. विरतास्वभिधाद्यासु ... कारिकां पूरयित्वा व्याख्यात।

62. 'विभावानुभावेन व्यक्तः ... इति कारिकां पूरयित्वा व्याख्यायताम्।

63. 'करुणादावपि रसे जायते ....', इति कारिकां पूरयित्वा व्याख्या कार्या।

64. 'अश्रुपातादयस्तद्वद् द्रुतत्वाच्चेतसा मताः' इति, स्पष्टयत।

65- 'तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम्' इत्यस्य व्याख्या कार्या।